# SAMPLE PAPER

**2009**

**संस्कृतम् {सम्प्रेषणाधारितम्}**

**COMMUNICATIVE SANSKRIT**

**अवधिः : होरात्रयम्** **CLASS- X** **पूर्णाङ्कः : 100**

**Time allowed: 3 hours** **Maximum Marks: 100**

| | |
|---|---|
| **खण्डः क : अपठितांश-अवबोधनम्**<br>**Section A: Unseen Reading Comprehension** | **15 Marks** |
| **खण्डः ख : रचनात्मक-कार्यम्**<br>**Section B: Writing Skills** | **20 Marks** |
| **खण्डः ग : अनुप्रयुक्त-व्याकरणम्**<br>**Section C: Applied Grammar** | **30 Marks** |
| **खण्डः घ : पठित-अवबोधनम्**<br>**Section D: Reading Comprehension** | **35 Marks** |

**Instructions:**

**निर्देशाः-**

i. **अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।**
   **The question paper has four sections.**
ii. **प्रतिखण्डम् उत्तराणि प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि ।**
   **The answers have to be written in a separate answer-sheet.**
iii. **प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।**
   **The answers to each section must be written at one place.**
iv. **प्रश्नपत्रे उत्तराणि न लेखनीयानि ।**
   **Don't answer in the question paper.**
v. **प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यं लेखनीया ।**
   **Write the question number according to the question paper.**
vi. **सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।**
   **Answer all the questions in "SANSKRIT".**

---

## खण्डः क (Section A)

## अपठितांश–अवबोधनम्

**Unseen Reading Comprehension** **15 Marks**

**1. अधोलिखित–अनुच्छेदद्वयं पठित्वा प्रदत्तप्रश्नान् पृथक् प्रदत्तायाम् उत्तरपुस्तिकायाम् उत्तरत :**

**Read the following two passages and answer the questions in the given answer-sheet:**

(क) प्रथमः अनुच्छेदः

दशरथस्य पिता अजः । तस्य पिता रघुः, तत्पिता दिलीपः इति रघुवंशः महद्भिः राजभिः युक्तः इति इतिहासे प्रसिद्धः वर्तते । दशरथः ऋष्यशृङ्गऋषेः प्रभावात् चतुरः पुत्रान् प्राप्नोत् । तेषु ज्येष्ठस्य रामस्य यौव्वराज्याभिषेकं कर्तुं यदा सः सन्नद्धः अभवत् तदा मन्थरया दुर्मन्त्रिता कैकेयी देवासुरयुद्धसंदर्भे दशरथेन प्रदत्तं वरद्वयं प्रार्थयति । तदनुसारेण रामस्य वनप्रेषणं भरतस्य अभिषेचनं च अनुष्ठेये भवतः । रामः एतद् आनन्देन एव

अङ्गीकृत्य वनं प्रति लक्ष्मणसीताभ्यां सह अगच्छत् । तदा अतीव दुःखेन दशरथः स्वपुत्राणम् अनुपस्थितौ मरणं प्राप्नोत् ।

**प्रश्नाः–**

**I. एकपदेन उत्तरत :**

**Answer in one word:** **1 x 2 = 2**

*i.* रघुः कस्य पुत्रः ?

*ii.* केषाम् अनुपस्थितौ दशरथः मरणं प्राप्नोत् ?

**II. पूर्णवाक्येन उत्तरत :**

**Answer in complete sentence:** **2 x 1 = 2**

*i.* वरद्वयानुसारेण दशरथेन के अनुष्ठेये भवतः ?

**III. यथानिर्देशम् उत्तरत :**

**Do as directed:** **½ x 2 = 1**

*i.* 'लक्ष्मणसीताभ्याम्' अस्य विग्रहवाक्यं लिखत ।

*ii.* 'रामस्य' इति पदस्य विशेषणं लिखत ।

**(ख)** <u>**द्वितीयः अनुच्छेदः**</u>

विश्वे अमेरिकादेशस्य अध्यक्षीयनिर्वाचनं महत् प्रमुखं च पात्रम् आवहति । एकविंशति–मासात्मकः प्रचारः अन्ते नूतनस्य अध्यक्षस्य चयनेन सह पर्यवस्यति । इदानीं डेमोक्रेट्–पक्षस्य अभ्यर्थी बराक् ओबामः विजित्य श्वेतभवनं प्रविशन् प्रथम–कृष्णवर्णीयः इति इतिहासे अङ्कितः अभवत् । तस्य प्रतिस्पर्धी रिपब्लिकन्–पक्षस्य जान् मेकेन् आसीत् । ओबामः सप्तचत्वारिंशत्–वर्षीयः अस्ति । सः हार्वर्ड्–प्रदेशे शिक्षणं प्राप्य न्यावादिनः उद्योगं करोति । सः च इलिनाय्स् प्रदेशस्य गवर्नर्–रूपेण राजकीयप्रवेशम् अकरोत् । " किम् अद्यापि अस्माकं पूर्वजानां स्वप्नाः अवशिष्टाः? इति येषाम् सन्देहः आसीत्, ये च प्रजाप्रभुत्वस्य शक्तिं पृच्छन्तः आसन् तेषां कृते अद्य उत्तरं लब्धम् । सदा महात्मा गान्धी मम स्पूर्तेः स्रोतः । सः सामान्यजाः एकीभूय असामान्यं साधितुं समर्थाः भविष्यन्ति इति प्रदर्शयिता इति पुण्यात्मा सः" इति ओबामः अवदत् । पत्नी–पुत्रीभ्यां सह वर्तमानः सः महतः परिवर्तनस्य नेता भवति इति सर्वेषाम् आशा ।

**प्रश्नाः–**

**I. एकपदेन उत्तरत :**

**Answer in one word:** **½ x 4 = 2**

*i.* ओबामस्य प्रतिस्पर्धी कः?

*ii.* ओबामः काभिः सह वर्तते ?

*iii.* ओबामः कति वर्षीयः ?

*iv.* विश्वे कस्य देशस्य अध्यक्षीयनिर्वाचनं महत् प्रमुखं च पात्रम् आवहति?

**II. पूर्णवाक्येन उत्तरत :**

**Answer in complete sentence:** **2 x 2 = 4**

*i.* ओबामः केन रूपेण राजकीयप्रवेशम् अकरोत् ?

*ii.* ओबामस्य विजयेन केषाम् उत्तरं लब्धम् ?

**III. यथानिर्देशम् उत्तरत :**

**Do as directed:** **½ x 4 = 2**

*i.* 'प्रदर्शयिता' इति पदं कस्य विशेषणम् ?

*ii.* 'न्यायवादिनः' इति पदे कः प्रत्ययः ?

*iii.* 'पर्यवस्यति' इति क्रियापदस्य कर्तृपदं किम् ?

*iv.* 'सर्वदा' इति पदस्य समानार्थकपदं चित्वा लिखत ।

**IV. अस्य अनुच्छेदस्य समुचितं शिर्षकं लिखत ।**

**Write a suitable title for the above paragraph.** **1 x 2 = 2**

## खण्डः – ख

## (रचनात्मकलेखनम् )

**Section B: Writing Skills**

**2. पित्रा पुत्रीं प्रति लिखितम् अधः दत्तं पत्रं पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत ।**

**Complete and rewrite the letter with the help of the words given in the box.** **½ x 10 = 5**

जनकपुरी
1.___________
दिनाङ्कः– 10–12–2008

प्रियपुत्रि! राधे!

2. __________।

कार्यबाहुल्याद् बहुदिनेभ्यः तुभ्यं पत्रं लेखितुं नाशकम् । त्वम् 3. __________असि? तव 4.__________ परीक्षाः मार्च–मासे भविष्यन्तीति ज्ञातम् । तदर्थं सततम् 5._______ निरता भूयाः । पूर्वसिद्धतापरीक्षास्वपि अवधानेन सह 6.________ लिखेः । यदि मद्द्वारा कापि 7.________ अपेक्ष्यते पत्रं लिखेः ।

8.__________ गृहमागमिष्यामि । शुभमस्तु ।

तव 9.______________
शङ्करः

| |
|---|
| सविधे,<br>कुमारी राधा<br>अष्टमः उपमार्गः, प्रथममुख्यमार्गः,<br>10. _______________<br>बेङ्गळूरु–560021 |

| |
|---|
| सहायता, अग्रिममासे, पिता, जयनगरम्, कथम्, नवदेहली, दशमकक्षायाः, शुभाशीर्वादाः, अध्ययने, उत्तराणि |

**3.नगरस्य जनबाहुल्यं वाहनबाहुल्यम् उद्दिश्य मार्गे द्वयोः नागरिकयोः सम्भाषणम् उचितपदैः पूरयित्वा लिखत ।**

**Complete the following dialogue with the help of the statements given in the box and rewrite in your answer-sheet:** **1 x 5 = 5**

कुप्पण्णः– अधुना अत्र नगरे गमनागमं दुष्करम् अभवत् ।

भोजः– सत्यम् । मार्गस्य पार्श्वे अपि गन्तुं न शक्नुमः । 1. ______________________________ ।

कुप्पण्णः– अद्यत्वे जनसङ्ख्या अपि वर्धिता । अतः वाहनानि अपि अधिकानि अभवन् ।

भोजः– 2. ________________________________________। अतः पादचारिणां कृते क्लेशः नासीत् ।

कुप्पण्णः– परम् अधुना मार्गविस्तरणाय तेषां कर्तनेन गमनागमनम् एव दुस्साध्यं सञ्जातम् ।

भोजः– यदि नगरीकरणम् एवमेव वर्धते तर्हि 3. ______________________________________ ।

कुप्पण्णः– जनैः विद्यावद्भिः जनैः अस्मिन् विषये कोऽपि उपायः शीघ्रं चिन्तनीयः ।

भोजः– न केवलं जनाः 4. __________________________________________ ।

कुप्पण्णः– तदर्थम् अस्माभिः चयनीयाः नायकाः योग्याः भवेयुः । 5.__________________________ ।

| |
|---|
| *नगरेषु सामान्यजनानां जीवनमेव दुष्करं भविष्यति । |
| *सर्वकारोऽपि पक्षादि भेदं विस्मृत्य जनहिताय कार्यं कुर्यात् । |
| *मदान्धाः न स्युः । |
| *पूर्वं मार्गस्य उभयोः पार्श्वयोः पूर्वम् अनेके वृक्षाः आसन् । |
| *वाहनानि समीपे एव वेगेन गच्छन्ति । |

**4. पञ्चसु संस्कृतवाक्येषु मञ्जूषा–पद–सहायतया अधोलिखितं चित्रं वर्णयत ।**

**Describe the following picture in five Sanskrit sentences with the help of words given in the box:**

**2x 5 =10**



| |
|---|
| कुटुम्बः, बालाः, कुक्कुटः, स्वपन्ति, छत्रम्, जीर्णतल्पः, कुक्कुरः, सुखिनः, सुखिनः, भित्तिः |

## खण्डः ग (Section C)

## अनुप्रयुक्तव्याकरणम्

**Applied Grammar**

5. **अधोलिखित–वाक्येषु रेखाङ्कित–पदेषु सन्धिच्छेदं सन्धिं वा विधाय उत्तरपुस्तिकायां लिखत ।**
**Rewrite the underlined words of the following sentences in your answer-sheet after joining or disjoining *Sandhis:*** **1 x 3 = 3**
   1. **मण्डूकः** वर्षाकाले शब्दायते ।
   2. किं कर्तुं शक्यते **दैवायत्ते** वस्तुनि ।
   3. **ताः+अत्र** पश्यन्ति ।

6. **अधोलिखित–अनुच्छेदे रेखाङ्कित–पदेषु समासविग्रहं कृत्वा पुनः उत्तरपुस्तिकायां लिखत ।**
**Disjoin the compounds in the underlined words and rewrite the paragraph in the answer-sheet:** **1 x 4 = 4**
   1. **पिकस्य च काकस्य च** को भेदः? इति केवलं 2. **वसन्तसमये** ज्ञायते । बकः आत्मानम् 3. **स्थिता प्रज्ञा यस्य सः** इति कथयति । मयूरः 4. **साट्टहासं** प्रविशति ।

7. **रेखाङ्कितपदानां प्रकृति–प्रत्ययान् योजयित्वा वाक्यानि पुनः लिखत ।**
**Rewrite the sentences after joining suffixes of underlined words :** **1 x 5 = 5**
   1. भीमः **पराक्रम + इनि** आसीत् ।
   2. सः **वीर + तल्** मूर्तिः इव प्रसिद्धः ।
   3. तस्य माता कुन्ती एका **साधु + ङीप्** महिला ।
   4. युद्धं **कृ + शतृ** सः सर्वान् कौरवान् अनाशयत् ।
   5. भीमस्य नाम सर्वैः सदा **स्मृ + अनीयर्** ।

8. **अधोलिखितां तालिकाम् उपयुज्य संस्कृते पञ्चवाक्यानि रचयत ।**
**Frame five sentences using the words in following table:** **1 x 5 =5**

| | | | |
|---|---|---|---|
| प्रकृतिः | एव | पक्षपातं | जननी |
| | विना | अस्माकं | पालयति |
| | सदा | अहितं | रक्षणीया |
| | कदापि | वयं | न करोति |
| | इव | अस्माभिः | भवेम |

9. **अधोलिखित–वार्तालापे रिक्तस्थानानि पूरयित्वा उत्तराणि एव उत्तरपुस्तिकायां लिखत ।**
**Fill in the blanks in the following dialogue and write the answers in the answer-sheet:** **1 x 3 =3**

पिता– पुत्र! _________ किमर्थं विद्यालयं न गच्छसि ?

पुत्रः – अद्य मम स्वास्थ्यं सम्यक् नास्ति । अतः मया न _________ ।

पिता – असत्यं मा वद । शीघ्रं गच्छ ।

पुत्रः– न न मया गृहे एव ____________ पठ्यन्ते ।

पिता– न केवलं गृहे पाठान् पठसि चेत् न पर्याप्तम्, विद्यालये अध्यापकानां मार्गदर्शनेन सह पठनीयम् ।

**10.अधोलिखितसम्भाषणशिबिरस्य कार्यसूच्याम् अङ्कानां स्थाने संस्कृतपदेषु समयम् उत्तरपुस्तिकायां लिखत ।**

**Here is the programme schedule of spoken Sanskrit workshop. Indicate the time in Sanskrit in the answer-sheet in place of figures.** **1 x 4 = 4**

9: 00 – शिबिरस्य आरम्भः ।

10: 45 – लघुविरामः ।

12:30 – भोजनविरामः ।

5:15 – छात्राणां प्रस्तुतिः ।

**11.अङ्कानां स्थाने संस्कृत–सङ्ख्यावाचक–विशेषण–पदानि प्रयुज्य उत्तराणि उत्तरपुस्तिकायां लिखत ।**

**Replacing numerals with Sanskrit adjectives in the following sentences, write your answers in the answer-sheet:** **½ x 4 = 2**

1. नक्षत्राणि __________ ( 27 ) भवन्ति ।
2. ___________ (3) बालिकासु रमा अन्यतमा ।
3. अरुणाचले ________ (50) अधिकाः नद्यः प्रवहन्ति ।
4. नरः _______ (2) अक्षिभ्यां पश्यति ।

**12.अधोलिखितवाक्यानां संशोधनं कृत्वा वाक्यानि पुनः उत्तरपुस्तिकायां लिखत ।**

**Correct and rewrite the following sentences in the answer-sheet:** **1 x 4 = 4**

1. एषः_मम विद्यालयः **सन्ति** ।
2. **इदं** विद्यालये पञ्चाशत् अध्यापकाः अध्यापिकाः च पाठयन्ति ।
3. किं **त्वं** पार्श्वे सङ्गणकयन्त्रम् अस्ति?
4. अद्यत्वे वयं सर्वाणि कार्याणि सङ्गणकयन्त्रेण एव **क्रियन्ते** ।

## खण्डः घ (Section D)

## पठित–अवबोधनम्

## Reading Comprehension

**13.अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्त–प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत ।**

**Read the following prose, poetry and drama passages and answer the given questions in the answer-sheet:**

**गद्यांशः–**

मम कलनस्य तु आधारः सूर्य एव । सूर्यस्य द्वे गती उत्तरायणं दक्षिणायनञ्च । प्रत्येकम् अयनस्य अवधिः षण्मासाः । भारतीयमासानां नामानि नक्षत्रनामभिः सम्बद्धानि । पूर्णिमायां यत् नक्षत्रं भवति तेनैव नाम्ना तस्य मासस्य नाम भवति । यथा चैत्रे मासे पूर्णिमा चित्रानक्षत्रयुता भवति, अतः तस्यमासस्य नाम 'चैत्रः' भवति ।

**प्रश्नाः–**

**I. एकपदेन उत्तरत :**

**Answer in one word:** **½ x2=1**

*i.* कालकलनस्य आधारः कः ?

*ii.* भारतीयमासानां नामानि कैः सम्बद्धानि ?

**II. पूर्णवाक्येन उत्तरत :**

**Answer in complete sentence:** **1 x 2 = 2**

*i.* सूर्यस्य कति गती ? तयोः नामनी लिखत ।

**III. यथानिर्देशम् उत्तरत :**

**Do as directed:** **1x 2 = 2**

*i.* 'पूर्णिमा' इति पदस्य विशेषणं लिखत ।

*ii.* 'प्रत्येकम्' इति पदस्य विग्रहं लिखत ।

**<u>पद्यांशः</u>–**

कोऽनर्थफलः? मानः, का सुखदा? साधुजनमैत्री ।
सर्वव्यसनविनाशे को दक्षः? सर्वथा त्यागी ॥

**I. एकपदेन उत्तरत :**

**Answer in one word:** **1 x 2 = 2**

*i.* का सुखदा भवति?

*ii.* मानः कीदृशः भवति ?

**II. पूर्णवाक्येन उत्तरत :**

**Answer in complete sentence:** **1 x 1 = 1**

*i.* त्यागी कीदृशः भवति ?

**III. यथानिर्देशम् उत्तरत :**

**Do as directed:** **1 x 2 = 2**

*i.* 'समर्थः' इत्यर्थे किं पदम् अत्र प्रयुक्तम्?

*ii.* 'त्यागी' इति पदस्य प्रकृति–प्रत्ययौ विभज्य लिखत ।

**<u>नाट्यांशः</u>–**

युधिष्ठिरः– अप्येवम् ! आचार्येण कीदृशः अनर्थः कृतः । किं चपलबालकेभ्यः एतादृश–भीषणानाम् अस्त्राणां प्रदानम् उचितम् ?

श्रीकृष्णः– शृणु तावत्, आचार्येण तु प्रियशिष्याय अर्जुनाय प्रीत्या मनसा ब्रह्मास्त्रशिक्षा प्रदत्ता । किन्तु पुत्रप्रेमपराधीनेन तेन अश्वत्थामा अपि तच्छिक्षया वञ्चितः न कृतः ।

अर्जुनः– अपरं च, अस्त्रशिक्षाप्रदानात् पूर्वम् आचार्यः पुत्रं सावधानम् अकरोत् । यथा –

परमापद्गतेनापि नैव तात त्वया रणे ।
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ॥

युधिष्ठिरः– सम्प्रति आश्वस्तः अस्मि । मन्ये सः ब्रह्मास्त्रप्रयोगं न करिष्यति ।

श्रीकृष्णः– तर्हि न जानासि तस्य मनोवृत्तिम् । पितुः उपदेशेन असन्तुष्टः सः एकदा द्वारकापुरीम् आगच्छत् । ब्रह्मास्त्रं दत्वा सः सुदर्शनचक्रम् अवाञ्छत् ।

**I. एकपदेन उत्तरत :**

**Answer in one word:** **½ x 3 = 1 ½**

*i.* आचार्येण प्रीत्या ब्रह्मास्त्रशिक्षा कस्मै प्रदत्ता ?

*ii.* कः सुदर्शनचक्रम् अवाञ्छत् ?

*iii.* कस्मात् पूर्वं आचार्यः स्वपुत्रं सावधानम् अकरोत् ?

**II. पूर्णवाक्येन उत्तरत :**

**Answer in complete sentence:** **2 x 1 = 2**

*i.* चपलबालकेभ्यः केषां प्रदानं न उचितम् ?

**III. यथानिर्देशम् उत्तरत :**

**Do as directed:** **½ x 3 = 1 ½**

*i.* 'अर्जुनाय' इति पदस्य विशेषणं किम् ?

*ii.* 'अवाञ्छत्' इति पदस्य कर्तृपदं किम् ?

*iii.* 'तर्हि न जानासि तस्य मनोवृत्तिम् ।' अस्मिन् वाक्ये 'तस्य' इति पदं कस्मै प्रयुक्तम् ?

**14. अधोलिखित–पद्यद्वयस्य भावार्थम् उपयुक्तपदैः पूरयित्वा पुनः लिखत ।**

**Rewrite the following explanations of the stanzas after completing them with appropriate words:**

**1 x 6 = 6**

**<u>अ.</u>** नलिनीगतजलवत्तरलं किम्? यौवनं धनं चायुः ।

कथय पुनः के शशिनः किरणसमाः? सज्जना एव ॥

**भावार्थः**–अत्र जगति 1.__________ , संपत् आयुः च पद्मस्य पत्रे स्थितः जलबिन्दुः 2._________ चञ्चलानि भवन्ति । उत्तमाः जनाः 3. __________ रश्मयः इव सर्वान् आह्लादयन्ति ।

**<u>आ.</u>** काकः कृष्णः पिकः कृष्णः, को भेदः पिककाकयोः ।

वसन्तसमये प्राप्ते, काकः काकः पिकः पिकः ॥

**<u>भावार्थः</u>** – यदा 1.______ आगच्छति तदा पिकस्य मधुरेण स्वरेण ज्ञायते यद् द्वयोः मध्ये कः 2.________ अस्ति अन्यथा द्वयोः एव वर्णः 3._______ भवति ।

**15.अधोलिखितपद्यद्वयस्य अन्वये रिक्तस्थानानि पूरयित्वा पुनः लिखत ।**

**Complete and rewrite the prose-order-renderings of the following two verses:** **½ x 6 = 3**

**अ.** अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।

अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥

**अन्वयः** – 1.________! अथ केन प्रयुक्तः अयं पूरुषः बलात् 2.________ अपि 3.________ नियोजित इव पापं चरति ।

**आ.** मित्ररूपा हि रिपवः सम्भाष्यन्ते विचक्षणैः ।
ये हितं वाक्यम् उत्सृज्य विपरीतोपसेविनः ॥

**अन्वयः** – ये 1. _______ वाक्यम् उत्सृज्य 2. _________ ते विचक्षणैः 3. ______ हि रिपवः सम्भाष्यन्ते ।

**16. रेखाङ्कित–पदानि आधृत्य प्रश्ननिर्माणं कुरुत ।**

**Frame questions on the basis of the underlined words:** **1 x4 = 4**

1. **साधुजनमैत्री** सुखदा भवति ।
2. अस्मिन् लोके **विवेकी** पण्डितः इति परिगण्यते ।
3. **जन्तोः** मूढता निद्रासमाना भवति ।
4. ललनाः **शिरसि** पुष्पाणि धरन्ति ।

**17. घटनाक्रमानुसारम् अधोलिखित–वाक्यानि पुनः लिखत ।**

**Rewrite the following sentences in the sequential order:** **½ x 8 = 4**

1. सः धनधान्यसमृद्धाः दानशालाः अकारयत् ।
2. राजा चक्षुर्द्वयमेव शक्राय प्रायच्छत् ।
3. शक्रस्य प्रभावेण राज्ञः द्वे नेत्रे प्रतिष्ठिते अभवताम् ।
4. देवराजः शक्रः तस्य दानशीलतां परीक्षितुम् आगतः ।
5. एकदा राजा सरोवरस्य समीपे विहरति स्म ।
6. सः एकस्य चक्षुषः दानम् ऐच्छत् ।
7. एकदा भगवान् बोधिसत्वः शिवीनां राजा बभूव ।
8. शक्रः पुनः उपस्थितः भूत्वा राजानं वरं याचितुम् अकथयत् ।

**18. अधिलिखित–वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् अर्थं चित्वा लिखत ।**

**Write the appropriate meanings for the underlined words:** **1x 3 = 3**

1. सर्वस्तरतु **दुर्गाणि** सर्वो भद्राणि पश्यतु ।
   अ. पर्वताः
   आ. सैन्यभवनम्
   इ. सङ्कटानि

3. **समन्तात्** वर्धमानाः अनलशिखाः आकाशं लिहन्ति ।
   अ. परितः
   आ. सामान्यतः
   इ. समो भूत्वा

2. अलम् अलं **मिथः** कलहेन ।
   अ. मिथुना
   आ. मिथ्या
   इ. परस्परम्